International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(6): 19-24
© 2017 IJSR
www.anantaajournal.com
Received: 07-09-2017
Accepted: 08-10-2017

**Bishnu Pada Pal**
M. Phil Scholar, Ramakrishna Mission Vivekananda University, Howrah, West Bengal, India

**Correspondence**
**Bishnu Pada Pal**
M. Phil Scholar, Ramakrishna Mission Vivekananda University, Howrah, West Bengal, India

# शब्दार्थसारमञ्जरीदिशा आख्यातार्थविमर्शः

**Bishnu Pada Pal**

## प्रस्तावना

मदीयशोधपत्रस्य विषयः शब्दार्थसारमञ्जरीदिशा आख्यातार्थविचारः। प्रबन्धेऽस्मिन् आख्यातार्थस्य विचारः क्रियते। आख्यातार्थः नाम कः इति विवेचनात् पूर्वं किं नाम आख्यातमिति मनसि प्रश्नः समुदेति। यतो हि बहुषु शास्त्रेषु आख्यातशब्दस्य बहुविधः अर्थः विद्यते। तथाहि- “आख्यातमाख्यातेन क्रियासातत्ये [1]” वार्तिके आख्यातशब्देन तिङन्तस्य ग्रहणं सम्भवति। अत एव वार्तिकार्थः सम्भवति यत् "तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने” इति। तेन खादतमोदता पचतभृज्जता इत्यादीनामुदाहरणानां सिद्धिः भवति। क्वचिच्च आख्यातशब्देन क्रियाप्रधानमाख्यातम् इत्यादौ यास्कवचनादिषु आख्यातशब्देन धातोर्ग्रहणं सम्भवति। अत एव नागेशेनोक्तं तस्य लघुमञ्जूषायाम्- “ तत्र ह्याख्यातशब्देनाख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुरूपमुच्यते” [2] इति। क्वचिच्च आख्यातेन तिङ्प्रत्ययानां ग्रहणं सम्भवति। तथाहि वदति जगदीशः शब्दशक्तिप्रकाशिकायाम्-

“धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते।”इति

अत एव आदौ प्रोक्तम् "तिङाख्यातयोः पर्यायत्वात् [3]” इति। एवञ्च आख्यातपदेन क्वचित् तिङन्तस्य, क्वचित् धातोः ग्रहणम्, क्वचित् तिङ्-प्रत्ययस्य ग्रहणं वर्तते, एवं च सति अत्र किं ग्राह्यमिति चेत् तिङ्-प्रत्ययस्यैव ग्रहणमतोऽत्र तिङ्प्रत्ययानामर्थस्य निरूपणं क्रियते।

## शब्दार्थसारमञ्जरीकारमतम्

श्रीजयकृष्णभट्टाचार्यस्य मते लकारस्थानीयतिङ् एव आख्यातपदवाच्यः। लट्लोडादिलकारस्य स्थाने तिङ्-प्रत्ययाः जायन्ते। तिप्-तस्-झि इत्यादिप्रत्ययाः तिङ्पदवाच्याः। आख्यातत्वञ्च धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थशब्दत्वम्। तथा चाख्यातसामान्यस्य यत्नापरनामकृतौ शक्तिः। शक्तौ च अनुकूलत्वसम्बन्धेन धात्वर्थस्य विशेषणतया धात्वर्थावच्छिन्नयत्नो बोध्यते। शाब्दबोधे तादृशस्य यत्नस्य विधेयतया भानात्। तादृशयत्नविधेयताकान्वयबोधसमर्थः शब्दः तिङ्-प्रत्ययादिभिर्बोध्यः। स तिङ् आख्यातपदवाच्यः। स च आख्यातः त्रिविधः। तथाहि - क) कर्तृविहितः, ख) कर्मविहितः, ग) भावविहितश्च। कर्तृविहिततिङ् इत्युक्ते कर्तरि अर्थे विहितः तिङ्-प्रत्ययः। एवञ्च कर्मविहिततिङ् इत्युक्ते कर्मणि अर्थे विहितः तिङ्-प्रत्ययः। भावविहिततिङ् इत्युक्ते भावार्थे विहितः तिङ्-प्रत्ययः। कर्तृविहितकर्मविहितभावविहितत्रिविधाख्यातेषु कर्तृविहिताख्यातस्य कृतौ एव शक्तिः स्वीक्रियते। कृतिशब्दस्य अपरं नाम यत्नः। नैयायिकैस्त्वाख्यातस्य कृतौ शक्तिः समाश्रियते। वैयाकरणैः आख्यातस्य कर्तरि शक्तिः

स्वीक्रियते। वैयाकरणैस्तु "लः कर्मणि च भावे चाकर्मकेभ्यः" इत्यनुशासनबलात् पचतीत्यादेः आख्यातस्य धात्वर्थव्यापाराश्रये कर्तरि शक्तिः स्वीक्रियते। यतो हि चैत्रः पचति इत्यादौ कर्त्रा (पचत्याख्यातवाच्येन कर्त्रा सह) चैत्रपदस्य अभेदान्वयबोधः। अर्थात् एकत्वसङ्ख्याश्रयचैत्राभिन्नकर्तृवृत्तिवर्त्तमानकालिकः पाकानुकूलो व्यापारः इति व्याकरणमते शाब्दबोधः। एवं स्वीकारे सति गौरवमापद्यते किन्तु तेन आख्यातस्य यत्ने शक्तिः मन्तव्या। यतो हि आख्यातस्य कर्तरि शक्तिस्वीकारात् कर्त्तृनिष्ठो धर्मः कृतिरूप एव शक्यतावच्छेदकः स्यात्। कृतिस्तु प्रतिकर्त्तृ नानारूपतया भासते। ततश्च शक्यतावच्छेदकधर्माणामानन्त्यापत्तिः। परन्तु आख्यातस्य कृतौ शक्तिस्वीकारे सति शक्यतावच्छेदकत्वञ्च कृतित्वरूपम्। नानाकृतिषु अनुगता कृतित्वरूपा जातिस्तु एका। तस्मात् लाघवप्रियाः वयमाख्यातस्य कृतौ एव शक्तिं स्वीकुर्मः। तथाहि प्रोक्तम् - " तत्र कर्तृविहिताख्यातस्य कृतावेव शक्तिः। कृतित्वरूपशक्यतावच्छेदके लाघवात्। न कर्तरि। शक्यतावच्छेदककृतेरुननुगमात्।" [4] इति।

**शङ्का-**

आख्यातस्य कृतौ शक्तिस्वीकारे सति वैयाकरणाः दोषं प्रदर्शयामासुः। आख्यातप्रत्ययस्य कृतौ शक्तिस्वीकारे कर्त्ता तु नाख्यातवाच्यः। एवं तिङ्-प्रत्ययादिना कर्ता उक्तः भवति चेत् प्रथमा विभक्तिः सम्भवति। यथा चैत्रः पचति इत्यादौ तिङ्प्रत्ययेन कर्ता उक्तः। अत प्रथमा विभक्तिः भवति। चैत्रः पचति इत्यादिस्थले तु आख्यातस्य यत्ने शक्तिस्वीकारात् तिङा कर्ता नाभिहितः। अत एव अनभिहिते इत्यधिकारे कर्तृकरणयोस्तृतीया इति अनुशासनबलात् चैत्रः इत्यत्र तृतीयाविभक्तिः स्यात्। अत एव चैत्रः पचति इति वाक्यं तु कदापि न सम्भवति। सदैव चैत्रः पचति इत्यत्र चैत्रेण पचति इत्येव प्रयोगः सम्भवेत्। एतादृशस्य दोषस्य वारणाय वैयाकरणाः आख्यातस्य कर्तरि शक्तिमङ्गीकुर्वन्ति। एतेन चैत्रः पचति इत्यादौ तिङा कर्ता भवति। अत एव कर्तुरभिधानात् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति पाणिनीयशास्त्रानुशासनात् कर्तरि प्रथमा विधीयते।

**समाधानम्**

नैयायिकनये वैयाकरणप्रदत्तदोषस्तु न सम्भवति। यतो हि नैयायिकास्तु कर्तृगतसंख्याभिधानानभिधानाभ्यां तृतीयादिविभक्तिं व्यवस्थापितवन्तः। यदा कर्तृगता संख्या आख्यातप्रत्ययेन प्रोक्ता न भवति तदा अनभिहिते इत्यधिकारबलात् कर्तृकरणयोस्तृतीया इति पाणिनीयानुशासनबलात् अनभिहिते कर्तरि तृतीया विभक्तिः सम्भवति। यदा तु कर्तृगता संख्या तिङा उक्ता भवति चेत् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति पाणिनीयानुशासनबलात् प्रथमाविभक्तिः जायते। यथा - चैत्रः पचति इत्यादिस्थले आख्यातेन तिङ्-प्रत्ययेन कर्तृगतसंख्या एकवचनरूपा उक्ता। अत एव चैत्रः इत्यत्र प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यनेन प्रथमा विभक्तिः। एवञ्च आख्यातस्य कृतौ शक्तिस्वीकारेऽपि न दोषाय। तथाहि प्रोक्तम् - "न चाख्यातेन कर्तुरनभिधाने चैत्रः पचतीत्यत्र चैत्रपदोत्तरं तृतीया, लकारेणानभिधानादिति वाच्यम्। कर्तृगतसंख्याभिधानानभिधानाभ्यां तृतीयादेर्व्यवस्थापितत्वात्। एवं व्यापारेऽपि न शक्तिः।[5] "इति।

**शङ्का**

अत्र मनसि शङ्का उदेति यत् आख्यातस्य कर्तरि शक्तिः न भवति इति तु सत्यम्। परन्तु आख्यातस्य व्यापारे शक्तिर्भवतु। आख्यातस्य व्यापारे शक्तिस्वीकारे न कापि हानिर्जायते। अत एव आख्यातस्य व्यापारे शक्तिर्भवतु इति पूर्वपक्षि णः मतं विद्यते।

**समाधानम्**

आख्यातस्य कर्तृशक्तिस्वीकारे सति यत्र यत्र व्यापारत्वं तत्र तत्र आख्यातत्वम्। तथा सति आख्याताभावे सति व्यापारस्यापि अभावः प्रतीयेत। कृत्यादिषु प्रत्ययेषु व्यापारस्य विद्यमानत्वे अपि आख्यातस्य अभावः दृश्यते। यदि आख्यातस्य व्यापारे शक्तिः स्वीक्रियते तर्हि कृत्यादिसाधारणप्रत्ययादिषु आख्यातस्य अभावे व्यापारस्य प्रतीतिः न भवेत्। परन्तु आख्यातस्याभावे अपि व्यापारस्य प्रतीतिवशात् ज्ञायते यत् आख्यातस्य व्यापारे शक्तिर्नास्ति।

**कर्तृविहिताख्यातस्य शाब्दबोधः**

कर्तृविहितस्य तिङ्-प्रत्ययस्य उदाहरणं हि चैत्रः तण्डुलं पचति इति। तण्डुलम् इत्यत्र तण्डुलपदेन तण्डुलोपस्थितिः। द्वितीयया विभक्त्या कर्मतारूपफलोपस्थितिः। तण्डुलरूपपदार्थस्य कर्मरूप-अम्विभक्तौ वृत्तित्वसम्बन्धेन अन्वेति। वृत्तिः नाम का इति चेदुच्यते आधेयत्वम् इति। तेन तण्डुलमित्युक्ते तण्डुलवृत्तिकर्मत्वमिति। पच्-धातुना पाकोपस्थितिः। पाकः नाम कः इति चेदुच्यते विक्लित्त्यनुकूलव्यापारः। विक्लित्त्यनुकूलव्यापारः च अधिश्रयणादि-अधःश्रयणान्तपूर्वापरीभूतव्यापारकलापः। तादृशपाके अनुकूलतासम्बन्धेन तण्डुलवृत्तिकर्मत्वमन्वेति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकः इति शाब्दबोधः। आख्यातेन कृत्युपस्थितिः जायते। एवञ्च कृतौ अनुकूलतासंसर्गेण तादृशपाकस्य अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलकृतिरित्यन्वयबोधः। पुनश्च चैत्रपदेन चैत्रपदोपस्थितिः। चैत्रे आश्रयतासम्बन्धेन तादृशकृतेः अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलकृत्याश्रयाभिन्नैकत्ववान् चैत्रः इति शाब्दबोधः। अत्र कर्तृविहिताख्यातस्य कृतौ वर्तमानत्वादौ एकत्वादौ च शक्तिः सिद्धा। एकत्वादौ इत्यत्र आदिपदेन द्वित्वबहुत्वयोः ग्रहणम्। एवञ्च वर्तमानत्वादौ इत्युक्ते अतीतत्वभविष्यत्त्वयोः ग्रहणम्। अर्थात् कृतौ अवच्छेद्यत्वसम्बन्धेन वर्तमानत्वादिकम् अन्वेति। कर्तरि एकत्वादिकं समवायसम्बन्धेन अन्वेति।

**शङ्का**

एकपदोपात्तपदार्थयोः न विशेष्यविशेषणभावेनान्वयबोधः इति कश्चित् प्रसिद्धः न्यायः। एवञ्च एकस्मात् पदात् उत्पन्नयोः पदार्थयोः कदापि विशेष्यविशेषणभावेन अन्वयबोधः न कार्यः। यथा- तिङ्-प्रत्ययेभ्यः कृतिसंख्याकालादीनामुत्पत्तिः जायते। पुनश्च आख्यातार्थकृतौ आख्यातार्थकालः अवच्छेद्यत्वसम्बन्धेन विशेषणं भवति। प्रकृतन्यायेन विरोधः समुत्पद्यते। अत एव आख्यातार्थकृतौ आख्यातार्थकालादीनामन्वयस्तु न्यायविरोधत्वात् दोषाय परिकल्प्यते।

**समाधानम्**

एकपदोपात्तयोः पदार्थयोः एव विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवति, इति नियमस्वीकारे तथा कापि राजाज्ञा न विलसति। एतेन एकपदोपात्तयोः पदार्थयोः विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवत्येव। एकस्मात् तिङ्प्रत्ययात् कृतिः कालश्च उत्पद्यते। तेन आख्यातार्थकृतौ अवच्छेद्यत्वसम्बन्धेन आख्यातार्थवर्तमानकालः विशेषणं सम्भवति। एतेन न कोऽपि दोषः भवति। तथाहि प्रोक्तं शब्दार्थसारमञ्जरीनामकग्रन्थे - " एकपदोपात्तपदार्थयोर्न विशेषणविशेष्यभावेनान्वयबोधः इति व्युत्पत्तेरस्वीकारादननुभवाच्च" [6] इति।

**कर्मविहिततिङ्**

कर्मणि वाच्ये विहिताख्यातस्य ते- प्रभृत्यात्मनेपदिप्रत्ययस्य धात्वर्थावच्छेदकीभूते फले शक्तिः समाश्रियते न तु कर्मणि। कर्मविहितस्य आख्याततिङ्प्रत्ययस्य कर्मणि शक्तिस्वीकारात् शक्यतावच्छेदकः कर्म भवति। तच्च कर्म प्रतिधात्वानुगुण्येन विविधम्। एवञ्च शक्यतावच्छेदकं बहुविधम्। परन्तु यदा कर्मणि वाच्ये विहितस्याख्यातस्य ते-प्रभृत्यात्मनेपदिनः प्रत्ययस्य धात्वर्थावच्छेदकीभूते फले शक्तिः समाश्रियते। तदा शक्यतावच्छेदकः फलत्वम्। तच्च धातुभेदे समानमेव। अत एव लाघवात् धात्वर्थावच्छेदकीभूते फले एव कर्मणि विहितस्य आख्यातस्य शक्तिः स्वीक्रियते। फलं धात्वर्थावच्छेदकम्। यतो हि धात्वर्थांशे अनुकूलतासम्बन्धेन प्रकारीभूतम्। अर्थात् धात्वर्थव्यापारे अनुकूलतासम्बन्धेन फलं विशेषणम्। यथा गमि-धातोः धात्वर्थावच्छिन्ने पादविक्षेपरूपव्यापारे अनुकूलतासम्बन्धेन उत्तरदेशसंयोगरूपफलं विशेषणम्। अत एव यः धातुः फलसहितं व्यापारं बोधयति स सकर्मकः। यः केवलं व्यापारबोधकः स अकर्मकः। यथा- गमि-धातुः उत्तरदेशसंयोगरूपफलावच्छिन्नं पादविक्षेपरूपव्यापारं बोधयति। अतः गमि-धातु सकर्मकः। पच्-धातुः विक्लित्तिरूपफलावच्छिन्नं फुत्कारादिव्यापारं बोधयति। अतः पचि-धातुः सकर्मकः। अस्- धातोः केवलं सत्तारूपव्यापारं बोधयति। अतः अस्धातुः अकर्मकः। सत्तारूपव्यापारे फलस्य विशेषणतया अन्वयाभावात् अस्-धातुः अकर्मकः। तथाहि प्रोच्यते शब्दशक्तिप्रकाशिकायाम्- "अत एव धातोः फलावच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वं तदबोधकत्वेनाकर्मकत्वमिति बोध्यम्" [7] इति।

कर्मणि वाच्ये विहितस्य ते-प्रभृत्यात्मनेपदिनः आख्यातप्रत्ययस्य धात्वर्थावच्छेदके फले, वर्तमानकालवृत्तित्वादौ एकत्वद्वित्वादिसंख्यायां च शक्तिः वर्तते। शाब्दबोधे वर्तमानत्वादिकम् अवच्छेद्यत्वसम्बन्धेन धात्वर्थावच्छिन्नफले अन्वेति। वर्तमानत्वादिकमित्यत्र आदिपदेन भूतत्वभविष्यत्त्वयोः ग्रहणम्। एवञ्च एकत्वादिकं तु समवायसम्बन्धेन फलाश्रये कर्मणि अन्वेति। एकत्वादिकमित्यत्र आदिपदेन द्वित्वबहुत्वयोः ग्रहणम्।

**शङ्का-**

कर्मणि वाच्ये विहितस्य आख्यातस्य धात्वर्थावच्छिन्नफले शक्तिस्वीकारे सति वैयाकरणाः दोषं प्रदर्शयामासुः। आख्यातप्रत्ययस्य फले शक्तिस्वीकारे कर्म तु नाख्यातवाच्यम्। एवं तिङ्-प्रत्ययादिना कर्म उक्तं भवति चेत् प्रथमा विभक्तिः सम्भवति। यथा चैत्रेण तण्डुलः पच्यते इत्यादौ तिङ्प्रत्ययेन कर्म उक्तम्। अतः प्रथमा विभक्तिः भवति। चैत्रेण तण्डुलः पच्यते इत्यादिस्थले तु आख्यातस्य फले शक्तिस्वीकारात् तिङा कर्म नाभिहितम्। अत एव अनभिहिते इत्यधिकारे कर्मणि द्वितीया इति अनुशासनबलात् तण्डुलम् इत्यत्र द्वितीयाविभक्तिः स्यात्। अत एव चैत्रेण तण्डुलः पच्यते इति वाक्यं तु कदापि न सम्भवति। सदैव चैत्रेण तण्डुलः पच्यते इत्यत्र चैत्रेण तण्डुलं पच्यते इत्येव प्रयोगः सम्भवेत्। एतादृशस्य दोषस्य वारणाय वैयाकरणाः कर्मणि विहितस्य आख्यातस्य कर्मणि शक्तिमङ्गीकुर्वन्ति। एतेन चैत्रेण तण्डुलः पच्यते इत्यादो तिङा कर्म भवति। अत एव कर्मणरभिधानात् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति पाणिनीयशास्त्रानुशासनात् कर्मणि प्रथमा विधीयते।

**समाधानम्**

नैयायिकनये वैयाकरणप्रदत्तदोषस्तु न सम्भवति। यतो हि नैयायिकास्तु कर्मगतसंख्याभिधानानभिधानाभ्यां द्वितीयादिविभक्तिं व्यवस्थापितवन्तः। यदा कर्मगता संख्या आख्यातप्रत्ययेन प्रोक्ता न भवति तदा अनभिहिते इत्यधिकारबलात् कर्मणि द्वितीया इति पाणिनीयानुशासनबलात् अनभिहिते कर्मणि द्वितीया विभक्तिः सम्भवति। यदा तु कर्मगता संख्या तिङा उक्ता भवति चेत् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति पाणिनीयानुशासनबलात् प्रथमाविभक्तिः जायते। यथा - चैत्रेण तण्डुलः पच्यते इत्यादिस्थले आख्यातेन तिङ्-प्रत्ययेन कर्मगतसंख्या एकवचनरूपा उक्ता। अत एव तण्डुलः इत्यत्र प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यनेन प्रथमा विभक्तिः। एवञ्च आख्यातस्य कर्मणि शक्तिस्वीकारेऽपि न दोषाय। तथाहि प्रोक्तम् - "कर्मगतसंख्याभिधानानभिधानाभ्यां द्वितीयादेर्व्यवस्थापितत्वात् इति।[8] "इति।

**कर्मविहिततिङः शाब्दबोधः**

कर्मविहिततिङः उदाहरणं हि चैत्रेण तण्डुलः पच्यते इति। चैत्रेण इत्यत्र चैत्रपदेन चैत्रस्य उपस्थितिः। तृतीयया कृतेः उपस्थितिः। चैत्ररूपपदार्थस्य वृत्तित्वसम्बन्धेन कृतौ उपस्थितिः। तेन चैत्रवृत्तिकृतिः इत्यर्थः। पच्-धातुना पाकोपस्थितिः जायते। चैत्रवृत्तिकृतेः जन्यतासम्बन्धेन पाके अन्वयः। तेन चैत्रवृत्तिकृतिजन्यपाकः इति शाब्दबोधः। कर्माख्यातेन फलोपस्थितिः। तेन चैत्रवृत्तिकृतिजन्यपाकस्य जन्यतासंसर्गेण फले अन्वयः विद्यते। तेन चैत्रवृत्तिकृतिजन्यपाकजन्यफलमित्यर्थः। तण्डुलपदेन तण्डुलोपस्थितिः जायते। तण्डुले आश्रयतासंसर्गेण चैत्रवृत्तिकृतिजन्यपाकजन्यफलस्य अन्वयः। तेन चैत्रवृत्तिकृतिजन्यपाकजन्यवर्तमानकालिकफलाश्रयवान् तण्डुलः इति शाब्दबोधः।

**शङ्का**

एकपदोपात्तपदार्थयोः न विशेष्यविशेषणभावेनान्वयबोधः इति कश्चित् प्रसिद्धः न्यायः। एवञ्च एकस्मात् पदात् उत्पन्नयोः पदार्थयोः कदापि विशेष्यविशेषणभावेन अन्वयबोधः न कार्यः। यथा- तिङ्-प्रत्ययेभ्यः कृतिसंख्याकालादीनामुत्पत्तिः जायते। पुनश्च आख्यातार्थधात्वर्थावच्छिन्नफले आख्यातार्थकालः अवच्छेद्यत्वसम्बन्धेन विशेषणं भवति। प्रकृतन्यायेन विरोधः समुत्पद्यते। अत एव आख्यातार्थधात्वर्थावच्छिन्नफले आख्यातार्थकालादीनामन्वयस्तु न्यायविरोधत्वात् दोषाय परिकल्प्यते।

**समाधानम्**

एकपदोपात्तयोः पदार्थयोः एव विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवति, इति नियमस्वीकारे तथा कापि राजाज्ञा न विलसति। एतेन एकपदोपात्तयोः पदार्थयोः विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवत्येव। एकस्मात् तिङ्प्रत्ययात् फलं कालश्च उत्पद्यते। तेन आख्यातार्थफले अवच्छेद्यत्वसम्बन्धेन आख्यातार्थवर्तमानकालः विशेषणं सम्भवति। एतेन न कोऽपि दोषः भवति। तथाहि प्रोक्तं शब्दार्थसारमञ्जरीनामकग्रन्थे - " एकपदोपात्तपदार्थयोर्न विशेषणविशेष्यभावेनान्वयबोधः इति व्युत्पत्तेरस्वीकारादननुभवाच्च" [9] इति।

**भावविहिततिङ्**

भावे वाच्ये विहितस्याख्यातस्य ते-प्रभृत्यात्मनेपदिनः प्रत्ययस्य धात्वर्थे एव शक्तिः विलसति। एवञ्च यद्धातूत्तरं भावप्रत्ययः तद्धातोरर्थे एव भावप्रत्ययस्य शक्तिः। भावे विहितस्य आख्यातप्रत्ययस्य संख्यादिकं न कुत्रापि अन्वेति। यतो हि संख्यान्वयिप्रथमान्तपदं तु वाक्ये न विलसति। एवञ्च प्रथमान्तपदे स्थितैकत्वादिसंख्यानुगुण्येन क्रियापदादिषु वचनस्य निर्धारणं भवति। एवञ्च प्रकृतप्रकरणे प्रथमान्तपदोपस्थाप्यसंख्यादिकानामभावात् एकवचनादिकं न क्रियापदे अन्वेति। अत्र पदस्य साधुत्वविधानाय एकवचनं प्रयुज्यते। तथाहि प्रोक्तम्- "तत्र संख्यान्वयिप्रथमान्तपदाभावात्। आख्यातेनोक्तसंख्यायाः प्रथमान्तपदोपस्थाप्यपदार्थान्वितत्वेन क्लृप्तत्वात्। एकवचनं प्रयोगसाधुत्वार्थकमेवेति।" [10] इति।

**शङ्का**

न्यायमते तु फलव्यापारौ धात्वर्थौ इति। धात्वर्थेन व्यापारस्य प्रतीतिर्जायते। एवञ्च भावे वाच्ये विहितस्य ते-प्रभृत्यात्मनेपदिनः प्रत्ययस्य धात्वर्थे एव शक्तिः समाश्रियते। भावविहिताख्यातस्थले धात्वर्थयोर्द्विधा भानेन उद्देश्यतावच्छेदकविधेययोः ऐक्ये शाब्दबोधस्वीकारात् घटः घटः इत्यादिवत् अनन्वयापत्तिः।

**समाधानम्**

अत्र समाधीयते घटः घटः इत्यादिवत् द्वयोः धात्वर्थयोः अन्वयाभावः न कदापि सम्भवति। यथा करोति इत्यादौ आख्यातार्थकृतेः धात्वर्थरूपतया आख्यातकृतेः वैयर्थ्यम्। तथा भावप्रत्ययस्थलेऽपि भावप्रत्ययार्थरूपधात्वर्थस्य वैयर्थ्यम्। तत्र मीमांसाशास्त्रं प्रमाणम्- "सम्भेदेनान्यतरवैयर्थ्यम्"इति। सम्भेदेन इत्युक्ते ऐक्यरूपेण। प्रकृतिप्रत्यययोः अभेदेन अन्यतरस्य (अन्यतरार्थस्य) वैयर्थ्यम्। एतेन अनन्वयापत्तिः न सम्भवति।

**शङ्का**

अत्र मनसि शङ्का समुदेति यत् भावप्रत्ययस्य वैयर्थ्ये सति भावप्रत्ययनिमित्तप्रत्ययप्रयोगः कदा वाक्ये दरीदृश्यते।

**समाधानम्**

"शास्त्रे नापदम् अप्रयुञ्जीत" इति नियमेन प्रयोगसाधुत्वार्थमेव तत्र प्रत्ययस्य प्रयोगः। भावप्रत्ययप्रयोगस्थले सर्वत्रैकवचनप्रयोगः विधीयते। भावविहिताख्यातप्रत्ययान्तस्थले सङ्ख्यायाः अन्वयः न जायते। यतो हि प्रथमान्तपदघटितत्वाभावात् संख्यायाः अन्वयो न जायते। यतो हि प्रथमान्तपदोपस्थाप्यैकत्वादिकमेव क्रियापदगतवचननिर्धारणे समर्थो भवति। प्रकृतशाब्दबोधे तु प्रथमान्तपदोपस्थाप्यसंख्याभावात् क्रियापदेषु एकत्वादिकं पदसाधुत्वार्थमिति। "शास्त्रे नापदम् अप्रयुञ्जीत" इति नियमात् अपदस्य प्रयोगनिषेधेन प्रत्ययरहितायाः प्रकृतेः प्रयोगासम्भवेन च पदत्वसिद्ध्यर्थमेव धात्वोत्तरं भावविहितप्रत्ययोपादानम्। तत्र च एकवचनं तु औत्सर्गिकत्वात् प्रथमोपस्थितत्वाच्च। तत्र प्रमाणं च यथा "सार्वधातुके यक्"(३/१/६३) इति पाणिनीयसूत्रव्याख्यावसरे "किन्त्वेकवचनमेव तस्योत्सर्गिकत्वेन संङ्ख्यानपेक्षणात्" इति। मुग्धबोधे च "भावे आद्यम् "इति सूत्रम्।

**भावविहिताख्यातस्य शाब्दबोधः**

भावविहितस्याख्यातस्य उदाहरणं हि चैत्रेण पक्वमिति। प्रकृतवाक्ये चैत्रेण इत्यत्र चैत्रपदेन चैत्रस्योपस्थितिः। चैत्रपदोत्तरतृतीयाविभक्त्या कृत्युपस्थितिः। चैत्रस्य वृत्तित्वसम्बन्धेन कृतौ अन्वयः। तेन चैत्रवृत्तिकृतिः। पच्-धातुना पाकोपस्थितिः। जन्यत्वं संसर्गः। एवञ्च चैत्रवृत्तिकृतेः जन्यत्वसम्बन्धेन पाके अन्वयः। तेन शाब्दबोधः चैत्रवृत्तिकृतिजन्यः पाकः इति।

**आख्यातविशेषार्थकथनम्**

यत्राख्यातस्य शक्यार्थान्वयबोधे बाधस्तत्र लक्ष्यार्थमादायैव अन्वयबोधनिर्वाह इति लक्ष्यार्थरूपमाख्यातस्य विशेषार्थमाह। विशेषार्थस्तु "सविषयकपदार्थाभिधायिधातूत्तरकर्तृविहिताख्यातस्याश्रयत्वे लक्षणा" इति। अर्थात् "ज्ञानेच्छाकृतिद्वेषरूपाः सविषयकाः" इति शास्त्रानुशासनात् सविषयकाः पदार्थाः ज्ञानेच्छाकृतिद्वेषरूपाः। ज्ञानेच्छाकृतिद्वेषरूपाभिधायिनः ये धातवः कृप्रभृतयः तदुत्तरवर्त्तिनः कर्तृविहिताख्यातस्य आश्रयत्वे लक्षणा। यथा करोतीत्यादौ कृत्यादेः कृतिप्रयोज्यत्वाभावेन आख्यातार्थकृतौ धात्वर्थकृतिद्वेषयत्नज्ञानेच्छादेः अनुकूलतासम्बन्धेन अन्वयबाधात् आश्रयत्वरूपलक्ष्यार्थमादाय अन्वयबोधनिर्वाहयत्नस्यापि कृतिपर्यायकतया सविषयकत्वं ग्राह्यम्। इदन्तु बोध्यम्- आख्यातस्य कृतिरूपार्थान्वयस्य बाधेऽपि, सङ्ख्या-कालरूपतदर्थयोः कर्तरि सङ्ख्यायां धात्वर्थे च वर्त्तमानत्वादिकालस्यान्वयबोधे न कोऽपि बाधकः। यथा चैत्रः घटं करोति इत्यत्र सविषयकपदार्थाभिधायिधातुकस्थले कर्मप्रत्ययस्य सविषयकत्वार्थकतया घटविषयकवर्तमानकृत्याश्रयः चैत्रः। एवं द्वेष्टि, यजति, जानाति इत्यादौ अपि बोध्यम्।

**शङ्का**

चैतन्यमात्रवृत्तिः कृतिः। अचेतनकर्तृकस्थले आख्यातस्य कृतिरूपार्थान्वयस्य बाधात् कथं कृतौ शक्तिः समाश्रियते। यथा रथो गच्छति इत्यादौ आख्यातस्य यत्ने शक्तिं स्वीकर्तुं न शक्यते। यतो हि रथस्तु अचेतनपदार्थः। रथो गच्छति इत्यादौ लकारसामान्यस्य आख्यातप्रत्ययस्य अनुकूलव्यापारे एव शक्तिः ग्राह्यः इति मीमांसकाः। यतो हि रथो गच्छति इत्यादौ व्यापारे शक्तिं विना कथं निर्वाहः, अचेतने रथे यत्नपर्यायायाः कृतेः अविद्यमानत्वात्। तस्मात् व्यापारे एव आख्यातस्य शक्तिः ग्राह्या।

**समाधानम्**

आख्यातसामान्यस्य यथा कर्त्तरि शक्तिः निराक्रियते, तथा व्यापारेऽपि शक्तिः निराक्रियते। रथो गच्छति इत्यादौ गमनानुकूलकृतिरूपस्याख्यातार्थस्य मुख्यार्थस्य जडे रथे बाधात् व्यापारे निरूढा लक्षणा न तु शक्तिः इति। एवं रथो गच्छति इत्यादौ गमिधातुना उत्तरदेशसंयोगानुकूलव्यापारोपस्थितिः। आख्यातेन लक्षणया आश्रयत्वोपस्थितिः। तदुपरि आश्रयत्वं च संसर्गः। तेन शाब्दबोधः उत्तरदेशसंयोगानुकूलव्यापाराश्रयत्वाश्रयः रथः इति। एवमेव नश्यति इत्यादौ प्रतियोगिनि लक्षणा।

**शाब्दबोधः**

रथो गच्छति इत्यादौ गमिधातुना उत्तरदेशसंयोगानुकूलव्यापारोपस्थितिः। आख्यातेन लक्षणया आश्रयत्वोपस्थितिः। तदुपरि आश्रयत्वं च संसर्गः। तेन शाब्दबोधः उत्तरदेशसंयोगानुकूलव्यापाराश्रयत्वाश्रयः रथः इति। त्यजति इत्यत्र त्यज्धातुना पूर्वदेशविभागानुकूलक्रियोपस्थितिः। आख्यातेन कृत्युपस्थितिः। आश्रयत्वं संसर्गः। तेन पूर्वदेशविभागानुकूलकृत्याश्रयः इति बोधः। एवं नश्यतीत्यादौ नश्-धातुना नाशोपस्थितिः। आख्यातेन लक्षणया प्रतियोगित्वोपस्थितिः। आश्रयत्वं च संसर्गः। तेन नाशप्रतियोगित्वाश्रयः इति शाब्दबोधः।

**उपसंहृतिः**

मदीयशोधपत्रे शब्दार्थसारमञ्जरीस्थाख्यातप्रकरणं समाश्रित्य विशिष्टविचारः कृतः। आख्यातः लकारस्थानीयतिङ्प्रत्ययः। आख्यातस्तु त्रिविधः। कर्तृविहिताख्यातः, कर्मविहिताख्यातः, भावविहिताख्यातः चेति। आख्यातस्य कृतौ शक्तिग्रहणे सति कर्तुरनभिहितत्वात् प्रथमायाः स्थाने तृतीयैव सर्वदा भविता इति वैयाकरणैः आक्षेपे क्रियमाणे सति कर्तृसंख्याधारीकृत्य उक्तानुक्तव्यवस्थाकरणान्न दोषः इति नैयायिकाः। पुनश्च कृतिस्तु चैतन्यमात्रवृत्तित्वात् अचेतने रथादौ तदसम्भवात् कृत्याश्रये लक्षणा। तेन जानाति, द्वेष्टि, गच्छति, यजति इत्यादौ न दोषः। प्रकृते मीमासंकवैयाकरणानां मतानि आधारीकृत्य समागतस्य दोषस्य समाधानं विहितम्। अत्र तु कृत्यादिप्रत्ययानाम्, णिजन्तस्य, सन्नन्तस्य च वाक्यस्य शाब्दबोधः न प्रदर्शितः। चैत्रः तण्डुलं पचति इति कर्तृविहिताख्यातस्य स्थले तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलवर्तमानकृत्याश्रयः चैत्रः इति शाब्दबोधः। एवञ्च चैत्रेण तण्डुलः पच्यते इति कर्मविहिताख्यातस्य स्थले चैत्रवृत्तिकृतिजन्यपाकजन्यवर्तमानफलाश्रयाभिन्नैकत्ववान् तण्डुलः इति शाब्दबोधः। पुनश्च चैत्रेण पक्वम् इति भावविहितस्थले चैत्रवृत्तिकृतिजन्यः पाकः इति। एवञ्च प्रकृतग्रन्थे भावकर्तृकर्मविहितकृत्यप्रत्ययानां शाब्दबोधविषये विचार्यमाणे सत्यपि विस्तारभारभयात् तत्तच्छाब्दबोधविषये न किमपि चर्चितमिति शिवम्।

**सङ्केतसूची**

1. वै. सि. कौ. - वैयाकरणसिद्धान्तकौमुदी।
2. वै. सि. म – वैयाकरणसिद्धान्तमञ्जूषा।
3. श. श. प्र. - शब्दशक्तिप्रकाशिका।

4. श. स. म- शब्दार्थसारमञ्जरी।
5. प. सं. - पत्रसंख्या।
6. नागेशः। परमलघुमञ्जूषा। दाहालः लोकमणिः(सम्पा०)। २०११। वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।
7. भट्टः विश्वनाथपञ्चाननः। न्यायसिद्धान्तमुक्तावली(प्रभाटीकोपेता)। शास्त्री नरसिंहदेवः(सम्पा०)। १९९०। वाराणसी : व्यास प्रकाशनम्।
8. भट्टः कौण्डः। वैयाकरणभूषणसारः (सावित्रीटीकोपेता)। मिश्रः आद्याप्रसादः(सम्पा०)। १९८८। वाराणसी : सम्पूर्णानन्द विश्वविद्यालयः
9. भट्टः गदाधरः। व्युत्पत्तिवादः (विद्वन्मनोरमटीकोपेता)। शतपथी हरेकृष्णः(सम्पा०)। २०११। तिरुपति: राष्ट्रीय संस्कृत विद्यापीठम्।
10. भट्टः श्रीजयकृष्णः। शब्दार्थसारमञ्जरी। पण्डा रमेशचन्द्र (सम्पा०)। वाराणसी : काशी हिन्दु विद्यालयः।
11. भट्टः नागेशः। वैयाकरणसिद्धान्तमञ्जूषा। शुक्लः कालिकाप्रसादः (सम्पा०)। १९७७। वाराणसी : सम्पूर्णानन्द विश्वविद्यालयः।
12. जगदीशतर्कालङ्कारः। शब्दशक्तिप्रकाशिका। २००७। वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।